P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-8* (Part-1) April- 2019
E: ISSN NO.: 2349-980X Shrinkhla Ek Shodhparak Vaicharik Patrika

# सुजनकृत शब्दलिङ्गार्थचन्द्रिका–एकमवलोकनम्

**सारांश**

शब्दानां पदानां वा प्रचलिता शुद्धरूपाणां प्रसिद्धार्थनिर्देशपूर्वकं लिङ्गनिर्देशपुरस्सरं च क्रमेणोपन्यासो भवति यत्र स कोशः शब्दसंग्रहः इति अभिधीयते। भारतीयपरम्परायां सर्वप्राचीनकोशः निघण्टुः वर्तते। अस्योपरि यास्काचार्येण निरुक्तं संरचितमस्ति। लौकिकसंस्कृतसाहित्ये पदपदार्थज्ञानाय अमरकोशः प्रधानः भवति। अमरकोशात् परं बहुनां नानाथर्क–समानार्थक–अनेकार्थकोशादीनां प्रणयनमभूत्। शब्दलिङ्गार्थचन्द्रिका नाम नानार्थकोशग्रन्थः श्रीमता सुजनभट्टेन प्रतिभाशालिना कविश्वरेण निरमायि। अयं ग्रन्थः तु न प्रकाशितः। अपि तु मातृकारूपेण मातृकागारे संरक्षितः। अस्मिन् ग्रन्थे काण्डत्रयं वर्तते ते यथा– प्रथमकाण्डे एकलिङ्गिशब्दाः द्वितीयकाण्डे द्विलिङ्गिशब्दाः तृतीयकाण्डे त्रिषु लिङ्गेषु विद्यमानाः शब्दानां संग्रह विद्यते। मातृकागारे केवलं मातृकारूपेण स्थितानां वहुमूल्य ग्रन्थानां परिप्रकाशार्थं तथा शब्दकोशानामपि रक्षाकरणार्थं आवाभ्याम् उपलब्धमातृकाणां आधारेण शोधप्रपत्रम् प्रस्तूयते।

**मुख्य शब्द** : अमरमण्डनम्, जग्गकवीश्वरः, दृष्टान्तसिद्धाञ्जन, पाण्डुलिपिः, शब्दलिङ्गार्थचनद्रिका, सरतः, साहित्यकल्पलतिका, सुजनः,

**श्री श्रीकान्त परिडा**
शोधार्थी,
संस्कृत विभाग,
पुदुच्चेरी यूनिवर्सिटी,
पुदुच्चेरी, भारत

**सी. एस. राधाकृष्ण**
प्रोफेसर,
संस्कृत विभाग,
पुदुच्चेरी यूनिवर्सिटी,
पुदुच्चेरी, भारत

**प्रस्तावना**

शब्दसङ्केतपर्यायादीनाञ्च प्रतिपादकाः ।
कोशाः कोषा इवाऽभान्ति शब्दरत्नैः प्रपूरिताः ॥

राष्ट्रस्य सर्वाङ्गीणसमृद्धेः कारणरूपो यथाह्यर्थकोषः तथा ज्ञानप्रकर्षस्य, भाषा संस्कृतिविकासस्य च परिचायकः परिमापकश्च शब्दार्थरत्नैः सुसमृद्धः कोशः प्रतिभाति। भाषायाः विस्मृता अव्यवहृताश्च शब्दाः शब्दकोशैः एव सुलभतया विज्ञाता भवन्ति ।।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः[1]॥

व्याकरणोपमान–कोशाप्तवाक्य–व्यवहार वाक्यशेषो विवरण प्रसिद्धशब्दानां सन्निध्ये संकेतग्रहणं भवति। परिगणितेषु समेषु शक्तिग्रहकेषु कोशस्तावत् प्रधानं पदं भजते । यतो हि यौगिकशब्दानां व्यूत्पत्तिप्रदर्शनंविधया व्याकरणं सङ्केतं विज्ञापयति। परन्तु रूढ–योगारूढादि शब्दानां सङ्केतं ग्रहणं व्याकरणेषु नैव भवति। कोशः तु रूढ–योगरूढ लक्षक परिभाषिक सिद्ध–सिद्धरूढयौगिकः नानार्थादि विविध शब्दानां सङ्केतं परिज्ञापयितुं प्रभवति। इत्थं संस्कृतशब्दकोशाः शक्तिग्राहकत्वेन समस्तसंस्कृतशब्दानां नितरां प्रामाण्यं समावहति।

कोशः किल संस्कृतसाहित्ये व्यवहारिकसाहित्यस्य एकं महत्वपूर्णमङ्गमस्ति। एतामेव उपादेयतामाधारीकृत्य संस्कृते वेदकालात् एव कोशानां प्रणयनमभूत् । अमरात् परकालीनाः संस्कृतकोशाः बहुविधप्रणालिमेवाश्रित्य विरचिता। ताषु कोशग्रन्थरचनाप्रणालिषु कतिपयकोशाः नानार्थशब्दभूता (Synonymous) अपरे च लिङ्गमात्रतन्त्रभूताः(Homonymous) एकाक्षराद्यासन्। एषामेव पूर्वकोशानामाधारं गृहीत्वा सुजनभट्टः शब्दलिङ्गार्थचनद्रिका नाम संस्कृतकोशं विरचयामास।

**शब्दलिङ्गार्थचन्द्रिकायाः महनीयता**

सुजनकृत शब्दलिङ्गार्थचन्द्रिका यद्यपि नानार्थशब्दकोशरचनायाः उत्तरकाले लिखितम् ततोऽपि एकमत्यन्तोपयोगि, लिङ्गभेदानुसारं नानार्थशब्दानां संग्रहणं अनुपमग्रन्थरत्नमस्ति। अस्मिन् लिङ्गपुरस्सरंविषयकशब्दानां व्याख्या च स्थाने स्थाने विवेचिता। यथा–

नेत्रान्तरे च नक्षत्रे तारकः तारकापि च ।
दैत्ये तु तारकः पुंसि तारके तारकः त्रिषु ॥

चटकः कुक्कुटेऽपि स्यात्कलविङ्के त्रिषु स्मृतः ।

पारदे सूतकः पुंसि स्यादशौचवती त्रिषु[2] ॥

लौकिकसंस्कृतपदानां समानार्थकशब्दोऽत्रोपलब्ध भवति। नेदं च केवलं समानार्थकोशमात्रमेव अपितु व्याकरणस्यापि अपूर्वं सम्पत्। क्वचित् शब्दानां अर्थं लौकिकशब्दानां लिङ्गज्ञानं च सर्वमिदं शब्दलिङ्गार्थचनद्रिकायां समुद्घोषितम्। अनेन प्रकारेण सुजनेन नानार्थकवैज्ञानिककोशशास्त्रस्य वैज्ञानिककोशरचनाशैल्यां सस्थापिता।

**कोशकारपरिचयः**

संस्कृतस्य कतिकोशकाराः एवं विधाः सन्ति येषां नामदेशकालादिकं नोपलभ्यन्ते न चैव कोशसाहित्यं तेषां विवरणं प्रददाति। तथापि कश्चित् निश्चयो निर्णयश्च अस्माभिर्विधेय एव। प्राचीनमातृकाणां ग्रन्थानां ग्रन्थव्याख्यानां टीकानां चाध्ययनेन येषां कोशकाराणां नामादिकमुपलभ्यते नूनमेव तत्सर्वं तेषामस्तित्वज्ञानाय सुदृढप्रमाणभूतम्। एवं विधानुसन्धानानुरूपं कोशकाराणां नामादिकं पाण्डुलिप्यां उपलब्धम्। कृष्णसुरीविरचितायां साहित्यकल्पलतिकायां अमरमण्डनखण्डे कविसुजनस्य वंशानुक्रम गुरुशिष्यपरम्परा च प्रदत्ता[3]। अमरमण्डनानुसारं सुजनस्य गुरोः नाम दिवाकरभट्टः, पुत्रः केसरिभट्टः आसीत्। केसरिभट्टस्य पुत्रः कल्लोलः यः स्वपितामहस्य शब्दलिङ्गार्थचन्द्रिकायामुपरि दृष्टान्तसिद्धाञ्जनव्याख्या नाम टीकां लिखितवान्। दृष्टान्तसिद्धाञ्जनव्याख्यायाः मङ्गलाचरणे उल्लिखितम् यथा–

श्रीसर्वमङ्गलां देवीं श्रितिपालनतत्पराम् ।
आश्रये वाक्सहायार्थमरुणां कुलदेवताम्॥
समस्तविद्यासारज्ञं साधुपण्डितपूजितम् ।
संनम्रशिरसा वन्दे सुजनं मत्पितामहम्॥
सर्वविद्यासु सारस्यं ज्ञात्वा तन्मुखपङ्कजात् ।
तदाज्ञाकज्जलेनाहं सम्यक्पश्यामि चन्द्रिकाम्॥
करिष्ये शब्दलिङ्गार्थचन्द्रिकातत्त्वशोधनम् ।
दृष्टान्तसिद्धाञ्जनं सद्व्याख्यानं विशदर्थकम्[4]॥

पुनः कल्लोलभट्टाचार्यस्य पुत्रः मुकुन्दनारायणः तथा प्रपुत्रः चकोरः[5] आसीत्।

दृष्टान्तसिद्धाञ्जमव्याख्यामोपरि 'सरतः' नाम टीकाग्रन्थः चकोरेणः लिखितम्। अप्रकाशितस्य अस्य टीकाग्रन्थस्य मातृका चेन्नै नगरीसर्वकारीय हस्तलिपिमातृका ग्रन्थालये[6] विद्यते। कोशकारः सुजनः अस्मिन् ग्रन्थे स्वपाण्डित्यस्य परिचय पुष्पिकायां प्रदत्तवान्। तात्कालिकसमये श्रीसुजनस्य पाण्डित्ये पण्डिताः सर्वथा नतमस्तकाः आसन्। यथा ग्रन्थस्यान्ते स्वयं ग्रन्थर्कत्रा उक्तम् –

'इतिश्रीमदनवद्यविद्याहृद्याखण्ड–पाण्डित्यमण्डितपण्डित–मण्डलविकट–पटुतरकिरीट–पटलतटपटुघटित–मरकतमुखमणिगणघटनसः दीप्यमानारुणचरणनखेन शश्वदमन्दानन्द–संदोह कन्दलीकृत– हृदयारविन्दसभेन समस्तविपक्षपक्षदक्षप्रशस्तमस्तकविन्यस्तवामपादेन सकलदर्शनाप्रतिद्वन्द्वभूतपादेन सर्वदानन्दितस्वजनेन श्रीसुजनेन विरचितायां निखिलकोशसाररूप–विरचितायामखिलसरससान्द्रिकायां शव्दलिङ्गार्थचन्द्रिकायां सर्वलिङ्गकाण्डः संपूर्णः'। कोशकारः सुजनभट्टः सुजनकवि सुजनपण्डितो[7] नाम्ना सुप्रसिद्धः वैयाकरणा असीत्।

**देशकालश्च**

सुजनकृतग्रन्थेषु तस्य स्थितिकालविषयकज्ञानं कुत्रापि न दृश्यते। अस्य जन्मस्थानं सम्भवतः आन्द्रप्रदेशस्य पीठापुरनगरे भवितुर्महति[8]। राओ वेङ्कट नीलाद्रि रायनिङ्गरुः आन्द्रप्रदेशस्य पीठापुरनगरे १७७८–१८२८AD तमे वर्षे राजा आसीत्। तस्य राजसभायां देवुलपाल्लि सीतारामातर्वणि सभापण्डितः रूपेण विभूषितः। अस्य सभापण्डितस्य प्रपितामह जग्गकवीश्वरः यः सुजनस्य भ्राता आसीत्। अतः सुजनभट्टस्य समयः प्रायः १५००–१६००AD भवितुर्महति।

**शब्दलिङ्गार्थचन्द्रिका**

शब्दलिङ्गार्थचन्द्रिकाग्रन्थः एकः सरल सुबोध्य व्यवहारोपयोगीशब्दानां समूहात्मकः समृद्धग्रन्थो अस्ति। अस्मिन् कोशग्रन्थे शब्दानां लिङ्गाध्ययनविधि नानार्थकशब्दानां प्रचलितार्थानां वर्णक्रमानुसारेण सविस्तर्येण विवरणं वरीवर्ति। प्राय अनुष्टुप्छन्दसि अस्य निर्माणम्जातम्। अयं कोशः शब्दस्य लिङ्गभेदेन भिन्नभिन्न रूपाणां समानार्थकशब्दानां तस्यार्थानां उल्लेखं करोति। कोशेऽस्मिन् एकलिङ्गै–द्विब्लङ्गैत्रिलिङ्ग इति त्रिणिकाण्डान्युपलभ्यन्ते। एकलिङ्गिकाण्डे एकलिङ्गिशब्दानां तस्य पर्यायवाचि शव्दानां च संङ्कलनमस्ति । द्वितीयकाण्डे द्विलिङ्गिकाण्डे वा उभयलिङ्गिशब्दानां संग्रहः तावदुपलभ्यते। त्रिलिङ्गिकाण्डे त्रिषु लिङ्गेषु विद्यमानां प्रयुज्यमानां शब्दानां सङ्कलनं गर्भीकृतं विद्यते। कोशेऽस्मिन् पुं–नपुं–स्त्री–अस्त्री–क्लीबादि शब्दानां प्रयोगं कृत्वा संस्कृतनामलिङ्गप्रदर्शनार्थं सौन्दर्यपूर्वकं कोशग्रन्थं प्रणितवान्। ग्रन्थादौ श्रीमान् सुजनभट्टः संज्ञाशब्दानां परिदीपनाय स्वचिकीर्षितस्याऽस्य शब्दलिङ्गार्थचन्द्रिकायाः निर्विघ्नपरिसमाप्त्यार्थं विहितं प्रणामादिकं मङ्गलसूचनं शिष्यशिक्षार्थं ग्रन्थादौ दर्शयति । यथा–

देदीप्यमानौ देव्यास्तौ देयास्तौ चरणौ शुभम् ।
कञ्जकिञ्जल्कपुञ्जाभमञ्जुमंजीररंजितौ ।।
सरस्वती रसे तृप्तस्सोहं सस्संविचार्य च ।
सरस्वती विलासाय संसृजद्यत्सुमानसम् ।।
सोऽयं श्रीसुजन स्तस्या लास्यमभ्यास इष्यति ।
पश्यन्तु लास्यसर्वस्वसारसंग्रहणे भवः ।।
सोऽयं करोति सद्ग्रन्थानालोच्याबुधचेतसां ।
अज्ञानग्रन्थि भेदार्थ शब्दलिंङ्गार्थचन्द्रिकाम् ।।[9] इति

**शब्दलिङ्गार्थचन्द्रिकायाः व्याख्यानग्रन्थाः**

शब्दलिङ्गार्थचन्द्रिकाकोशग्रन्थोऽयं त्रिकाण्डात्मकः। अस्योपरि कल्लोलभट्टाचार्येण दृष्टान्तसिद्धाञ्जनम् नाम व्याख्या लिखिता । इयं व्याख्या विद्वत्तापूर्णा प्रमाणिका च। व्याख्यानग्रन्थस्य मङ्गलाचरणानन्तरं कल्लोलभट्टाचार्येण उक्तम्।

समस्तविद्यासारङ्गं साधुपण्डितपूजितम् ।

सनम्रशिरसा वन्दे सुजनं मत्पितामह॥

सर्वविद्यसु सारस्यं ज्ञात्वा तन्मुखपङ्कजात् ।

तदाज्ञाकज्जलेनाहं सम्यक्पस्यामि चन्द्रिकाम्॥

करिष्ये शब्दलिङ्गार्थचन्द्रिकातत्त्वशोधनम् ।

दृष्टान्तसिद्धाञ्जनं सद्व्याख्यानं विशदार्थकम्॥[10]

एतद समीचीनं अस्ति यत् कल्लोलभट्टाचार्यः सुजनस्य प्रपौत्र आसीत्। अप्रकाशितस्य अस्य टीकाग्रन्थस्य मातृका चेन्नै नगरीय हस्तलिपिमातृकाग्रन्थालये[11] विद्यते। अपि च आडियार् मातृकाग्रन्थालये तालपत्रेण तेलुगुलिप्यां लिखिता प्रतिकृतिः विद्यते ।

अस्य ग्रन्थस्य पाठसमीक्षात्मकं सम्पादनं आवाभ्याम् सज्जीकृत्य यावद् शीघ्रं विदुषां दृष्टिगुचरं यथा भवेत् तथा प्रयत्नः क्रियमाणः विद्यते ।

**पाद टिप्पणी**

1. नममाला
2. *Sabdalingarthachandrika, M.D. 1761, Palm Leaves no 68, GOML, Chennai*
3. *Dr. P. Srirama,Contribution of Andhra to Sanskrit Literature, p. 159*
4. *Adyar II. p. 44b. Adyar D. VI. 1019(Shelf number 20.K.41.)p.408*
5. *A dictionary of Sanskrit Grammar, p.139, Contribution of Andhra to Sanskrit Literature, p. 130*
6. *GOML, Chennai*
7. *A dictionary of Sanskrit Grammar, p.399*
8. *Dr. P. Srirama Murti, Contribution of Andhra to Sanskrit Literature, p. 130*
9. *Sabdalingarthachandrika, M.D. 1761, Palm leaves no.48, GOML, Chennai, Adya. , D.VI.1017. 1018. Palm leaves no- 1. p.1*
10. *Adyar II. p. 44b. Adyar D. VI. 1019(Shelf number 20.K.41.)p.408*
11. *Mss. No-R.1720(a),Paper,Page no-17, GOML, Chennai*

**सहायकग्रन्थाः**


1. *अग्रवाल, मनीषा (२००८), संस्कृतद्विरूपकोशों का समालोचनात्मक अध्ययन, न्यू भारतीय बुक कार्पोरेशन, दिल्ली*
2. *उपाध्याय, आचार्य बलदेव(१९९४), संस्कृत शास्त्रों का इतिहास, चौखम्भा विद्याभवन, वाराणसी*
3. *द्विवेदी, डा. बालमुकुन्द(१९७९), संस्कृत कोष उद्भव और विकास, स्मृति प्रकाशन, इलाहाबाद्*
4. *धनञ्जय(१९५०), नाममाला, भारतीयज्ञानपीठ काशी*
5. *नारंग, डा. स्त्यपाल नारंग(१९९८),संस्कृत कोश शास्त्र के विविध आयाम, राष्ट्रियसंस्कृतसंस्थानम्, नऊ दिल्ला*
6. *शर्मा, डा.द्वब्रत सेन(१९८७), संस्कृतकोश का उद्भव एवं विकास, हरियाणा साहित्य अकादमी, चण्डीगढ*
7. *शास्त्री, डा हरकृष्ण(१९८९), संस्कृतवाङ्मयम्– दातारः, तीर्ति सौरभ प्रकाशनम्, वाराणसी*
8. *Abhyankar, Kashinath Vasudev(1961), A dictionary of Sanskrit Grammar, Oriental Institute, Baroda*
9. *A Descriptivecatalog of the Sanskrit manuscript, government oriental manuscript library, Chennai.*
10. *Das, Dr. Srinirudha(1978), New Catalogus Catalogorum, Vol- xxxiii, University of Madras, p.107*
11. *H. G. Narahari(1943), The Sabdalingarthachandrika of sujana, The Adyar Library Bulletin, Vol.XII, p.41*
12. *Murti, Dr. P. Srirama(1972), Contribution of Andhra to Sanskrit Literature, Andhra University, Waltair*